(प्रश्नोत्तमाला)

St. C. P. 121

नं० १०२४-घ

प्रश्नरत्नमाला

नं० १० २४-घ

प्रश्नोत्तरमाला नं० १०२४-ब कर्त्ता शंकराचार्यः

ॐ श्रीगणेशाय नमः ॥ ॐ अपारसंसारसमुद्रमध्ये निमज्जतो मे शरणं किमस्ति
गुरो कृपालो कृपया वदैतद्विश्वेशपादांबुजदीर्घनौका ॥ १ ॥ बंधो हि को यो विष
यानुरागः को वा विमुक्तो विषये विरक्तः ॥ को वास्ति घोरो नरकः स्वदेहः तृष्णा
क्षयः स्वर्गपदं किमस्ति ॥ २ ॥ संसारहृत्कः श्रुतिजात्मबोधः को मोक्षहेतुः क
थितः स एव ॥ द्वारं किमेकं नरकस्य नारी का स्वर्गदा प्राणभृतामहिंसा ॥ ३ ॥
शेते सुखं कस्तु समाधिनिष्ठो जागर्ति को वा सदसद्विवेकी ॥ के शत्रवः संति
निजेंद्रियाणि तान्येव मित्राणि जितानि यानि ॥ ४ ॥ को वा दरिद्रो हि विशा
लतृष्णः श्रीमांश्च को यस्य समस्ततोषः ॥ जीवन्मृतो कस्तु निरुद्यमो यः का
मामृता स्यात्सुखदा निराशा ॥ ५ ॥ पाशो हि को यो ममताभिमानः संमोह
यत्येव सुरेव का स्त्री ॥ को वा महांधो मदनातुरो यो मृत्युश्च को वापयशः
स्वकीयं ॥ ६ ॥ को वा गुरुर्यो हि हितोपदेष्टा शिष्यस्तु को यो गुरुभक्त एव ॥ को
दीर्घरोगो भव एव साधो किमौषधं तस्य विचार एव ॥ ७ ॥ किं भूषणाद्भूषणम
स्ति शीलं तीर्थं परं किं स्वमनो विशुद्धं ॥ किमत्र हेयं कनकं च कांता श्राव्यं स

दा किंगुरवेदवाको॥ ८॥ केदेहिनबोद्धसगानेस्तु संतिसत्संगतिर्दीतेविचारतो
षा केसंतिसंतोखिलवीतरागाग्रपणास्तमोहाशिवतत्वनिष्ठा॥ ९॥ कोवा
ज्वरःप्राणभृतोहि चिंतामृखोस्तिकोयस्तुविवेकहीनः॥ कायामयाका
शिवविस्नुभक्तिःकिंजीवनंदोषविवर्जितंयत॥ १०॥ विद्याहिकाब्रह्मग
तिप्रदायाबोधोस्तिकोयस्तुविमुक्तिहेतुः॥ कोलाभआत्मावगमोहियो।
हिजितंजगत्केनमनोहियेन॥ ११॥ शूरान्महाशूरतमोस्तिकोवामनोज
बाणैर्व्यथितोनयस्तु॥ प्राज्ञोतिधीरश्चसमोस्तिकोवाप्राप्तोनमोहंलल
नाकटाक्षैः॥ १२॥ विषाद्विषंकिंविषयाःसमस्ताडुःखीसदाकोविषया
नुरागी॥ धन्योस्तिकोयस्तुपरोपकारीकःपूजनीयोननुतत्वनिष्ठा॥ १३ ५
सर्वास्ववस्थास्वपि किंनकार्यंकिंवाविधेयंविदुषःप्रयत्नात॥ स्नेहश्चपा
पंपठनंचधर्मःसंसारमूलंहिकिमस्तिचिंता॥ १४॥ विज्ञान्महाविज्ञत
मोस्तिकोवानार्यापिशाच्यानचवंचितोयः॥ काशृंखलाप्राणभृतोंच

२ नारी ॥ दिव्यं व्रतं किं च निरस्तदैन्यं ॥१५॥ ज्ञातुं न शक्यं हि किमस्ति सर्वैर्योषि
न्मनो यच्चरितं तदीयं ॥ कादुस्त्यजा सर्वजनैर्दुराशा विद्याविहीनः पशुरस्ति
को वा ॥१६॥ वासो न संगः सह कैर्विधेयो मूर्खैश्च पापैश्च खलैश्च नीचैः ॥ मुमु
क्षुणा किं त्वरितं विधेयं सत्संगतिर्निर्ममतेशभक्तिः ॥१७॥ लघुत्वमूलं च कि
मर्थितैव गुरुत्वमूलं यदयाचनं किं ॥ जातोस्ति को यस्य पुनर्न जन्म को वा
मृतो यस्य पुनर्न मृत्युः ॥१८॥ मूकोस्ति को वा बधिरश्च को वा युक्तं न वक्तुं सम
ये समर्थः ॥ तथ्यं सुपथ्यं न शृणोति वाक्यं विश्वासपात्रं न किमस्ति नारी ॥१९॥
तत्त्वं किमेकं शिवमद्वितीयं किमुत्तमं सच्चरितं यदस्ति ॥ किं कर्म कृत्वा न च
शोचनीयं कामारिकंसारिसमर्चनाख्यं ॥२०॥ शत्रोर्महाशत्रुतमोस्ति को
वा कामः सकोपानृतलोभतृष्णा ॥ न पूर्यते को विषयैः स एव किं दुःखमू
लं ममताभिधानं ॥२१॥ किं मंडनं साक्षरता मुखस्य सत्यं च किं भूतहितं तदे
व ॥ त्वक्का सुखावे किं स्त्रियमेव सम्यक् ॥ देयं परं किं त्वभयं सदैव ॥२२॥ कस्मा २

स्तिनाशोमनसोहिमोक्षःक्वसर्वथानास्तिभयंविमुक्तौ॥शल्यंपरंकिंनि
जमूर्खतैवकेकेह्युपास्यागुरवश्चवृद्धाः॥२३॥उपस्थितेप्राणहरेकृतांतेकि तो
3 माशुकार्यंसुधियाप्रयत्नात्॥वाक्कायचित्तैःसुखदंयमघ्नंमुरारिपादांबु
जमेवचिंत्यं॥२४॥केदस्यवःसंतिकुवासनाख्याःकःशोभतेयःसदसिप्रवि
द्यः शांतेवकायासुखदासुविद्याकिमेधतेदानवशात्सुविद्या॥२५॥कुतो
द्भीतिःसततंविधेयालोकापवादाद्भवकाननाच्च॥कोवास्तिबंधुःपि
तरौचकौवाविपत्सहायःपरिपालकोयः॥२६॥बुद्ध्वानबुद्धंपरिशिष्यतेकिं
शिवंप्रशांतंसुखबोधरूपं॥ज्ञातेतुकस्मिन्विदितंजगत्स्यात्सर्वात्मकेब्र
ह्मणिपूर्णरूपे॥२७॥किंदुर्लभंसद्गुरुरस्तिलोकेसत्संगतिर्ब्रह्मविचारणा
च॥त्यागोहिसर्वस्यशिवात्मबोधः॥किंदुर्जयंसर्वजनैर्मनोजः॥२८॥पशोः
पशुःकोनकरोतिधर्मंप्राधीतशास्त्रोपिनचात्मबोधः॥किंतद्विषंभाति
सुधोपमंस्त्रीकेशत्रवोमित्रवदात्मजाद्याः॥२९॥विद्युच्चलंकिंधनयौवना

३ सुदानं परं किं च सुपात्रदत्तं ॥ कंठंगतैरप्यसुभिर्न कार्यं किं किं विधेयं म-
लिनं शिवार्चा ॥ ३० ॥ किं कर्म यत्प्रीतिकरं मुरारेः क्वास्थैन कार्या सततं भ-
वाब्धौ ॥ अहर्निशं किं परिचिंतनीयं संसारमिथ्यात्वशिवात्मतत्वं ॥ ३१ ॥
कंठंगता वा श्रवणंगता वा प्रश्नोत्तराख्या मणिरत्नमाला ॥ तनोति मोदं
विदुषां प्रयत्नाद्रमेशगौरीशपदैकसेव्या ॥ ३२ ॥ इति श्रीमत्शंकराचार्य-
विरचितं रत्नमालास्तोत्रं संपूर्णं ॥ ॥ ॥ ॥